अनिर्वचनीयख्यातौ पञ्चकोत्पत्तिनिरूपणम्

Dr.Karthik Sarma K.
Asst. Professor,School of Vedic Knowledge System,CVV, Ernakulam

Abstract

पक्षतावच्छेदकनिरूपणावसरे सत्तादात्म्यरूपविशेषणस्य सत्प्रतियोगिकतादात्म्यरूपार्थे पर्यवसितस्य प्रपञ्चे अभावात् पक्षाप्रसिद्धिमाशङ्क्य तत्परिहारः प्रदर्शितः अस्ति लघुचन्द्रिकायाम् । शुक्तौ रजतभ्रमस्थले यथा इदमि रजततादात्म्यम्, रजते च इदंतादात्म्यम् यथा अङ्गीक्रियते तद्वत् ब्रह्मणि दृश्यतादात्म्यम्, दृश्ये च ब्रह्मतादात्म्यं च अङ्गीकर्तव्यम् इत्येतत् निरूपितम् । अस्मिन् च प्रसङ्गे लघुचन्द्रिकाकारैः रजतम्, रजततादात्म्यम्, रजतत्वसंसर्गः, इदंतादात्म्यम्, इदन्त्वसंसर्गश्चेति पञ्च पदार्थाः उत्पद्यन्ते इत्येतत् निरूपितम् । एतेषां पञ्चानां पदर्थानाम् उत्पत्तौः अपेक्षिताः कार्यकारणभावाश्च निरूपिता । इमे विषयाः मया अस्मिन् शोधप्रबन्धे विमृश्यन्ते ।

Keywords— पक्षतावच्छेदकम्, अनिर्वचनीयख्यातिः, पञ्चकोत्पत्तिः, रजतभ्रमः, सत्तादात्म्यम्, अनिर्वचनीयवादः

1 उपोद्घातः

ब्रह्म प्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हत्वे सति चिद्भिन्नत्वं सिद्धान्ते पक्षतावच्छेदकत्वेन अभिमतम् अस्ति । अत्र च लाघवात् सत्त्वेन प्रतीत्यर्हत्वं सत्तादात्म्यम् इति पर्यवसितम् । तच्च सत्प्रतियोगिकतादात्म्यम् । इदञ्च अनुपपन्नम् इति पूर्वपक्षी आशङ्कते ; 'इदं रजतम्' इति भ्रमानुसारेण इदंपदार्थे प्रातिभासिकस्य रजतस्य रजततादात्म्यस्य च उत्पत्तिः यथा त्वय अङ्गीक्रियते तद्वत् सिद्धान्ते सद्रूपे ब्रह्मणि दृश्यमात्रस्य दृश्यतादात्म्यस्य च उत्पत्तिः अवश्यं वाच्या । एवमपि सिद्धान्ते घटादिदृश्ये ब्रह्मणः अध्यासस्तु नाङ्गीक्रियते इति कृत्वा घटादिदृश्ये सत्तादात्म्यं नाङ्गीकर्तुं शक्यते इति कृत्वा पक्षतावच्छेदकघटकस्य सत्तादात्म्यस्य घटादिप्रपञ्चे अभावात् पक्षाप्रसिद्धिः भवति । एतत्प्रसङ्गे लघुचन्द्रिकाकारैः उक्तम् इदमि रजतस्य यः तादात्म्येन विशेषणतया च आरोपः, रजते च इदमः तादाम्येन विशेषणतया च यः आरोपः वर्तते, तयोः अनुभवबलादेव यथा इदमि रजततादात्म्यं, रजते च इदंतादात्म्यं अस्तीति अवगम्यते तद्वत् सद्रूपब्रह्मणि घटादिदृश्यतादात्म्यम्, घटादिदृश्ये च सत्तादात्म्यम् अस्तीति अवगम्यते इति । तथा च दृष्टान्ते आदौ तादात्म्यद्वयस्य उपपादनं कृत्वा दार्ष्टान्तिकेऽपि तत् समर्थनीयम् ।

2 प्रातिभासिकरजतभ्रमस्थले तादात्म्यद्वयोपपादनम्

शुक्तौ रजतभ्रमस्थले भ्रमविषयकानुव्यवसायस्य द्विविधः आकारः अनुभूयते 'इदं रजतम् जानामि' इत्येकः आकारः , 'रजतम् इदम् जानामि' इत्यपरः आकारः । आभ्याम् अनुव्यवसायज्ञानाभ्याम् व्यवसायज्ञानस्य द्विविधः आकारः अस्तीति ज्ञायते ; 'इदं रजतम्' इत्येकः आकारः, 'रजतम् इदम्' इति अपरः । ज्ञानयोश्च आकारभेदः विषयभेदेन उपपादनीयः । तस्मात् 'इदं रजतम' इति ज्ञानस्य, 'रजतम् इदम्' इति ज्ञानस्य च भिन्नविषयकत्वं निरूपणीयम् । परन्तु उभयोः अपि ज्ञानयोः इदंपदार्थविषयकत्वं रजतपदार्थविषयकत्वं च समानमिति तदादाय भिन्नविषयकत्वं न निरूपयितुं शक्यते । तस्मात् संसर्गांशे भेदः सम्पाद्यते । यथा "भूतले घटः" इति बुद्धेः 'भूतलं घटवत्' इति बुद्धेश्च भूतलविषयकत्वं घटविषयकत्वं च समानं चेदपि संसर्गांशे भेदं सम्पाद्य भिन्नविषयकत्वं सम्पाद्यते । एवं प्रकृते तादात्म्यरूपः संसर्गः भिद्यते इति अवश्यं वाच्यम् । चिद्रूपज्ञाननिरूपितविषयता चित्तादात्म्यरूपा इति अङ्गीक्रियते । सा च चित्तादात्म्यरूपा विषयता त्रिविधा ; प्रकारता विशेष्यता संसर्गता च । 'इदं रजतम्' इत्यत्र इदंतादात्म्यं (इदंनिष्ठविषयता) यदस्ति

तत् रजतादात्म्यस्य (रजतनिष्ठविषयतायाः) संसर्गतादाम्यस्य (संसर्गनिष्ठविषयतायाः) च अवच्छेदकं भवति । इदंतादात्म्यावच्छेदेनैव एव रजततादात्म्यविशिष्टसंसर्गतादात्म्यम् अनुव्यवसाये भाति । तत्र अवच्छेदकीभूतं यत् इदंचित्तादात्म्यं तत् विशेष्यता इति शब्देन उच्यते । अवच्छेद्यम् अस्ति रजततादात्म्यविशिष्टसंसर्गतादात्म्यम् । तत्र अवच्छेद्ये विशेषणीभूतं यत् तादात्म्यं तत् विशेषणता भवति । अवच्छेद्ये विशेष्यभूतं तादात्म्यं तु संसर्गता भवति । विशेषणसम्बन्धः विशेष्यावच्छेदेन ज्ञाने भाति इति अनुभवानुसारेण इदं कल्पनम् । यथा 'घटो नीलः' इति ज्ञाने नीलरूपविशेषणसम्बन्धः घटावच्छेदेन अनुव्यवसायेन अवगम्यते । तथा "इदं रजतम्" इत्यत्र इदंतादात्म्यावच्छिन्नं रजततत्संसर्गचित्तादात्म्यं व्यवसायनिष्ठं अनुव्यवसायेन विषयीक्रियते । एवमेव "रजतम् इदम्" इत्यत्र रजतचित्तादात्म्यावच्छिन्नं इदंतत्संसर्गचित्तादात्म्यं व्यवसायनिष्ठम् अनुव्यवसायेन विषयीक्रियते । एवम् अवच्छेद्यावच्छेदकभावापन्नविषयताभेदेन अनयोः ज्ञानयोः आकारभेदः निरूपणियः । तन्निरूपणं च तादात्म्यव्यक्तिद्वयं विना न सम्भवतीति तादात्म्यद्वयम् उत्पद्यते इति स्वीक्रियते । किञ्च "इदं रजतम् इति यत् ज्ञानं रजतम् इदम् इति च यत् ज्ञानं तत् मिथ्या" इति बाधकप्रत्ययवशात् तादात्म्यद्वयोत्पत्तिः अङ्गीकार्या । तथा हि असति बाधके विशिष्टधर्मिकप्रतीतेः विशेषणेपि प्रकारावगाहित्वनियमः स्वीक्रियते । प्रकृते च तादात्म्येन यः रजतविशिष्टेदंपदार्थः वर्तते विषयतासम्बन्धेन तादृशेदंपदार्थविशिष्टज्ञानस्य "इदं रजतम्" इति ज्ञानस्य मिथ्यात्वमवगम्यते । एवम् तादात्म्येन यत् इदंपदार्थविशिष्टरजतं वर्तते विषयतासम्बन्धेन तादृशरजतविशिष्टज्ञानस्य "रजतम् इदम्" इति ज्ञानस्य अपि मिथ्यात्वम् अवगम्यते । तस्मात् तादृशज्ञानयोः विषयीभूतयोः द्विविधयोः तादात्म्ययोः मिथ्यात्वमपि पूर्वोक्तनियमेन अङ्गीकर्तव्यम् । तदर्थञ्च द्विविधयोः तादात्म्ययोः उत्पत्तिः वाच्या । ननु 'असति बाधके विशिष्टधर्मिकप्रतीतेः विशेषणेपि प्रकारावगाहित्वम्' इत्येव नियमः । तथा च प्रकृते बाधकसद्भावात् अयं नियमः अत्र न सञ्चारणीयः । बाधकञ्च प्रकृते किमिति चेदुच्यते भ्रमविषयाणां सर्वेषां बाध्यत्वाङ्गीकारे रजतभ्रमस्थले अधिष्ठानस्य इदमः अपि बाध्यत्वाङ्गीकारेण अधिष्ठानारोप्ययोः विशेषो न स्यात् । अत्रोच्यते सिद्धान्ते भ्रमविषयाणां सर्वेषाम् बाध्यत्वस्वीकारेऽपि भ्रमकाले इदमः मिथ्याभूतरजततादात्म्या नुपहितरूपेण सत्यत्वस्य अनुभवसिद्धत्वात् मिथ्यातादात्म्योपहितरूपेणैव मिथ्यात्वनिश्चयः न तु मिथ्याभूतरजततादात्म्या नुपहितरूपेण । आरोप्यभूतानां रजतादीनां प्रातिभासिकानां तु स्वरूपतः एव मिथ्यात्वनिश्चयः इत्येवं अधिष्ठानारोप्ययोः विशेषः । तथा च सति स्वरूपतो मिथ्याभूतानां रजतादीनाम् भ्रमकाले उत्पत्तिः अपि वाच्या । तदुक्तं लघुचन्द्रिकायाम् एतत्प्रसङ्गे ; 'इदमाद्यवच्छेदेन रजतादिकं तत्तादात्म्यं रजतत्वादेः संसर्गश्च, रजताद्यवच्छेदेन इदमादेस्तादात्म्यम् इदंत्वादेः संसर्गश्च जायते' इति । तथा च द्विविधं भ्रमम् उपपादयितुं पञ्चानां पदार्थानाम् उत्पत्तिः अवश्यम् अङ्गीकर्तव्या इत्येवं लघुचन्द्रिकाकाराणाम् आशयः । ते च पदार्थाः भवन्ति ; रजतम् रजततादात्म्यम् (रजतप्रतियोगिकतादात्म्यम्) रजतत्वसंसर्गः इदंतादात्म्यम् (इदंप्रतियोगिकतादात्म्यम्) इदन्त्वसंसर्गः ननु शुक्तौ रजतभ्रमस्थके रजततत्तादात्म्यादीनां इदमि एव उत्पत्तिरस्तु किमर्थम् इदमवच्छेदेन चैतन्ये इत्युच्यते इति चेन्न चैतन्यस्यैव सर्वप्रपञ्चाधिष्ठानत्वात् चैतन्ये एव प्रातिभासिकस्य रजतादेः उत्पत्तिः वाच्या न तु इदंपदार्थे, इदंपदार्थस्य तु अधिष्ठानभूतचैतन्यावच्छेदकत्वमात्रम् न तु अधिष्ठानत्वम् । न च इदंपदार्थस्य अवच्छेदकत्वम् कुतः कल्प्यते इति चेन्न प्रातिभासिकस्य रजतस्य पुरतः एव प्रतीतिः नान्यत्र इति व्यवस्थाम् उपपादयितुं इदमः चैतन्यावच्छेदकत्वम् अवश्यं कल्पनीयम् । ननु भ्रमात् प्राक् विद्यमानानां एव रजतादीनाम् भ्रमे भानं बाध्यत्वञ्च अस्तु इति चेन्न भ्रमप्रतीतिनिर्वाहाय कल्प्यमानानां रजतादीनां प्रतीतिकाले एव विद्यमानत्वं कल्पयितुं शक्यम् इति प्रतीतेः पूर्वं रजतादीनां सद्भावे प्रमाणाभावात् न दोषः । ननु रजतस्य प्रतीतेः पूर्वम् अविद्यमानत्वे तेन सह इन्द्रियसन्निकर्षासम्भवात् प्रतीतिरेव कथं स्यादिति चेदुच्यते प्रातिभासिकरजतस्य केवलसाक्षिवेद्यत्वाङ्गीकारेण प्रमाणाजन्याविद्यावृत्त्यैव रजतस्य प्रतीतिः उपपादयितुं शक्यते इति कृत्वा रजतेन सह इन्द्रियसन्निकर्षः नापेक्षितः । ननु परिवर्त्यस्थापनस्थले एकस्याः एव संयोगव्यक्तेः घटपटैतदुभयप्रतियोगिकत्वकल्पनेन विशिष्टप्रतीतिद्वयम् उपपाद्यते तद्वत् प्रकृतेऽपि एकस्याः एव तादात्म्यव्यक्तेः उभयप्रतियोगकत्वकल्पनेनैव द्विविधभ्रमोपपादनसम्भवात् तादात्म्यद्वयकल्पनं मास्तु इति चेन्न एका एव तादात्म्यव्यक्तिः यदि कल्प्यते तर्हि द्वयोः ज्ञानयोः आकारभेदः उपपादयितुं न शक्यते । तथा हि ज्ञानानां परस्परं वैलक्षण्यमेव आकारः इत्युच्यते । तच्च विभिन्नविषयकत्वरूपम् । तथा च 'इदं रजतम्' 'रजतम् इदम्' इति अनयोः ज्ञानयोः आकारभेदः यदि वक्तव्यः तर्हि अनयोः विषयभेदः सम्पादनीयः । रजतम् आदाय वा इदंपदार्थमादाय वा विभिन्नविषयकत्वम् उपपादयितुं न शक्यते उभयोरपि ज्ञानयोः तदुभयविषयकत्वात् । तस्मात् संसर्गविशेषं स्वीकृत्यैव अनयोः ज्ञानयोः विभिन्नविषयकत्वरूपः आकारविशेषं निरूपणीयः । तथा च 'इदं रजतम्' इत्यत्र रजतप्रतियोगिकतादात्म्यं विषयः, 'रजतम् इदम्' इत्यत्र तु इदंप्रतियोगिकतादात्म्यान्तरं विषय इति अवश्यम् अभ्युपेयम् । ननु एकस्याः एव तादात्म्यव्यक्तेः उभयप्रतोयोगिकत्वकल्पने सत्यपि 'इदं रजतम्' इत्यत्र तादात्म्यप्रतियोगित्वरूपः अंशः रजते भाति, 'रजतम् इदम्' इत्यत्र तु तादात्म्यानुयोगित्वं रजते भातीत्येवं आकारभेदः उपपादयितुं शक्यते खलु इति चेन्न संबन्धप्रतियोगित्वानुयोगित्वानां विशिष्टबुद्धिविषय-

त्वं नाङ्गीक्रियते इति कृत्वा पूर्वोक्तविधयैव आकारभेदः निरूपणीयः । ननु सम्बन्धप्रतियोगित्वानुयोगित्वानामपि विशिष्टबुद्धविषयत्वं स्वीक्रियताम् इति चेन्न इदंरजतयोः यदि एका एव तादात्म्यव्यक्तिः यदि अङ्गीक्रियते तर्हि कदाचित् एकस्मिन् ज्ञाने इदंरजतयोः तत्तादात्म्यानुयोगित्वप्रतियोगित्वे भासेते, कदाचित् तयोरेव तत्तादात्म्यप्रतियोगित्वानुयोगित्वे भासेते इत्येवं नियामकं न लभ्यते । किञ्च तादात्म्यव्यक्तेः एकत्वे, एकस्मिन्नेव तादात्म्ये रजतप्रतियोगित्वस्य रजतानुयोगित्वस्य च सत्त्वेन रजतस्य स्वस्मिन्नेव 'रजतम् रजतम्' इति स्वविशिष्टबुद्धेः वारणाय तत्तप्रतियोगित्वविशिष्टसम्बन्धानुयोगित्वस्य तद्विशिष्टबुद्धिविषयत्वनियामकत्वम् कल्पनीयम् । तथा च रजतप्रतियोकत्वविशिष्टतादात्म्यानुयोगित्वं तु इदमि एव न तु रजते इति कृत्वा न रजते स्वविशिष्टबुद्ध्यापत्तिः । परन्तु एतादृशनियामकत्वकल्पने गैरवम् इति तदपेक्षया लघुभूतं तादात्म्यद्वयकल्पनमेव वरम् । ननु विभिन्नविषयकत्वरूपवैलक्षण्याभावेऽपि प्रकारितविशेष्यितारूपविषयितावैलक्षण्येन पूर्वोक्तज्ञानयोः आकारभेदः निरूप्यताम् इति चेन्न

3 कार्यकारणभावनिरूपणम्

एतेषु रजतस्य रजतादात्म्यस्य रजतत्वसंसर्गस्य च उत्पत्तौ कः कार्यकारणभावः प्रमाणम् इति जिज्ञासायाम् ब्रह्मानन्दीये इदमुक्तम् ; "व्यावहारिकस्य इदमादेः स्वावच्छिन्नसंयोगादौ यत् कारणत्वं क्लृप्तं तत् अवच्छेदकतासम्बन्धेन स्वावच्छिन्नसामान्योत्पत्तौ" । इति कार्यम् - स्वावच्छिन्नम् कार्यतावच्छेदकम् - स्वावच्छिन्नत्वम् कार्यतावच्छेदकसम्बन्धः - अवच्छेदकतासम्बन्धः कारणम् - व्यावहारिकम् कारणतावच्छेदकम् - अवच्छेदकत्वं व्यावहारिकत्वम् वा कारणतावच्छेदकसम्बन्धः - तादात्म्यसम्बन्धः कार्यकारणयोः सामानाधिकरण्यञ्च इदंपदार्थान्तर्भावेण । 'इदं रजतम्' इति भ्रमकाले इदंपदार्थरूपं कारणम् कारणतावच्छेदकसम्बन्धेन तादात्म्येन इदंपदार्थे वर्तते । तत्रैव कार्यतावच्छेदकसम्बन्धेन अवच्छेदकतासम्बन्धेन स्वावच्छिन्नत्वरूपकारणतावच्छेदकविशिष्टाः रजत-रजततादात्म्य-रजतत्वसंसर्गाः उत्पद्यन्ते । अयञ्च कार्यकारणभावः अग्रकपिसंयोग योः क्लृप्तः । तथा हि वृक्षे कपिसंयोगः अग्रावच्छेदेन उत्पद्यते । अग्रावच्छेदेन उत्पद्यमानं कपिसंयोगं प्रति अग्रं कारणम् इति अङ्गीक्रियते । एतत्कार्यकारणभावानङ्गीकारे मूलावच्छिन्नसंयोगस्य अग्रावच्छेदेन उत्पत्तिः स्यात् । ननु अग्रकपिसंयोगयोः कार्यकारणभावाङ्गीकारे अपि अग्रत्वेन कपिसंयिगत्वेनैव कार्यकारणभावः अस्तु इति चेन्न तथा सति विभागादिकं प्रति पृथक् कारणता कल्पनीया स्यात् इति स्वावच्छिन्नत्वावच्छेदकत्वाभ्यामेव अत्र कार्यकारणभावः । यद्यपि रजतादितादात्म्यस्य घटावच्छेदेन चैतन्ये उत्पत्तिवारणाय अवच्छेदकतासम्बन्धेन रजतादितादात्म्यं प्रति इदमादेः तादात्म्येन हेतुताकल्पनं कर्तुं शक्यं तथाऽपि संयोगस्थले क्लृप्तकारणतयैव अस्मिन् स्थले पूर्वोक्तापत्तिवारणसम्भवात् न नूतनः कार्यकारणभावः कल्प्यते । इदंतादात्म्य-इदन्त्वसंसर्गयोः उत्पत्तौ कः कार्यकारणभावः प्रमाणम् इति जिज्ञासायाम् इदमुक्तं ब्रह्मानन्दीये ; 'अवच्छेदकतासम्बन्धेन तादात्म्यस्य उत्पत्तौ स्वपरिणामाव्यवहितपूर्वत्वविशिष्टमज्ञानं तादात्म्यभिन्नस्वपरिणामनिष्ठविषयतासम्बन्धेन हेतुः' इति । "रजतम् इदं" इति भ्रमकाले रजतावच्छेदेन इदंतादात्म्यम् उत्पद्यते । उत्पद्यमानं इदंतादात्म्यं प्रति रजतम् अवच्छेदकं यद्यपि भवति तथापि पूर्वसिद्धत्वाभावात् कारणत्वं तस्य नास्तीति पूर्वोक्तकार्यकारणभावेन अत्र निर्वाहो नास्ति । तस्मात् अयं नूतनः कार्यकारणभावः कल्पितः । कार्यम् - इदंतादात्म्यम् कार्यतावच्छेदकसम्बन्धः - अवच्छेदकतासम्बन्धः कारणम् - स्वपरिणामाव्यवहितपूर्वत्वविशिष्टमज्ञानम् कारणतावच्छेदकसम्बन्धः - तादात्म्यभिन्नस्वपरिणामनिष्ठविषयतासम्बन्धः सामानाधिकरण्यञ्च अत्र रजतावच्छेदेन । तस्मात् कारणतावच्छेदकसम्बन्धेन कारणम् रजते अस्तीति आदौ प्रदर्शनीयम् । तादात्म्यभिन्नत्वं परिणामे विशेषणम् ; तथा च तादात्म्यभिन्नः यः स्वपरिणामः तन्निष्ठा विषयता कारणतावच्छेदकसम्बन्धः । अत्र स्वम् - अज्ञानम्, स्वपरिणामः - रजतम्, तन्निष्ठा विषयता - ईश्वरज्ञाननिरुपितविषयता । तथा च रजतनिष्ठेश्वरज्ञाननिरूपितविषयतासम्बन्धेन अज्ञानं रजते अस्ति । तत्र च अवच्छेदकतासम्बन्धेन इदंतादात्म्यम् उत्पद्यते । अत्र च कारणतावच्छेदकसम्बन्धः यदि विषयतासम्बन्धः स्यात् तर्हि विषयतासम्बन्धस्य सर्वस्मिन् पदार्थे सत्वात् उदासीनपदार्थस्यापि इदंतादात्म्यावच्छेदकत्वम् स्यात् । तस्मात् स्वपरिणामनिष्ठत्वं विषयतायां विशेषणम् । परन्त्वेमपि रजततादात्म्यस्य इदंतादात्म्यावच्छेदकत्वम् स्यात् । तथा हि ईश्वरज्ञानस्य सर्वविषयकत्वात् रजततादात्म्यविषयकत्वम् अस्त्येव । इदञ्च रजततादात्म्यम् अज्ञानपरिणामश्च इति कृत्वा स्वपरिणामनिष्ठेश्वरज्ञाननिरूपितविषयता इत्यनेन रजतादात्म्यनिष्ठेश्वरज्ञाननिरूपितविषता ग्रहीतुं शक्यते , तेन सम्बन्धेन अज्ञानं रजतादात्म्ये अस्तीति तत्र अवच्छेदकतासम्बन्धेन इदंतादात्म्योत्पत्तिः स्यात् इति कृत्वा रजततादात्म्यस्य इदंतादात्म्यावच्छेदकत्वं स्यात् । तस्मात् तादात्म्यभिन्नत्वं स्वपरिणामे विशेषणं दातव्यम् । तथा च तादात्म्यभिन्नस्वपरिणामः इत्यनेन रजतमेव ग्रहीतुं शक्यते न तु रजततादात्म्यमिति न दोषः । ननु अत्र लघुभूततादात्म्यमेव कारणतावच्छेदकसम्बन्धः अस्तु कुतः गुरुभूतः तादात्म्यभिन्नस्वपरिणामनिष्ठविषयतासम्बन्धः इति चेन्न भाविनि रजते तादात्म्यसम्बन्धेन

कारणस्य अज्ञानस्य असत्वात् ननु इश्वरज्ञाननिरूपितविषयतापि तादात्म्यरुपा इति कथं तस्याः भाविरजतनिष्ठत्वमिति चेन्न ईश्वरज्ञानमत्र मायवृत्तिरूपं विवक्षितम् । विषयता च आकाराख्यविषयता विवक्षिता । तस्याश्च भाविभूतनिष्ठत्वात् न दोषः , चैतन्यनिरूपिततादात्म्यरूपविषयतायाः इव वृत्तिनिरूपिताकाराख्यविषयतायाः अपि सिद्धान्ते अङ्गीकारात् । तदुक्तम् "अद्वितसिद्धै अस्तीत्यादितद्विषयकव्यवहारप्रतिबन्धकाज्ञाननिवर्तनयोग्यत्वस्य, तत्सन्निकृष्टकरण जन्यत्वस्य वा तदाकारत्वरूपत्वात् ।तदुभयं च स्वकारणाधीनस्वभावविशेषात् ।" ननु अनेन कार्यकारणभावेन रजतावच्छेदेन इदंतादात्म्योत्पत्युपपादने अपि रजतावच्छेदेन पञ्चमस्य इदन्त्वसंसर्गस्य उत्पत्तिः कथं स्यात् इति चेत् इदन्त्वसंसर्गस्यापि तादात्म्यरूपत्वात् उभयानुगतकार्यतावच्छेदकस्य कल्पनीयत्वात् । ननु एवं पञ्चानां पदार्थानाम् उत्पत्त्युपपादनेपि तन्मध्ये यत् रजतप्रतियोगिकतादात्म्यं इदंप्रतियोगिकतादात्म्यं च तयोः रजतप्रतियोगिकत्वं इदंप्रतियोगिकत्वञ्च कथं स्यात् इति जिज्ञासायामुच्यते ; "तस्य च तादात्म्यस्य इदमादिप्रतियोगिकत्वसिद्धयये प्रतियोगितासम्बन्धेन तादात्म्यस्य उत्पत्तौ स्वाश्रयतावच्छेदकत्वसम्बन्धेन उक्ताज्ञानस्य हेतुतान्तरं कल्प्यते" इति कार्यम् – तादात्म्यम् कार्यतावच्छेदकसम्बन्धः – प्रतियोगितासम्बन्धः कारणम् – स्वपरिणामाव्यवहितपूर्वत्वविशिष्टमज्ञानम् कारणतावच्छेदकसम्बन्धः -स्वाश्रयतावच्छेदकत्वसम्बन्धः "रजतम् इदम्" इति ज्ञाने इदंप्रतियोगिकतादात्म्यं विषयः । स्वम् – अज्ञानम् , स्वाश्रयः – इदमवच्छिन्नचैतन्यम् , स्वाश्रयतावच्छेदकम् – इदंपदार्थः । तथा च स्वाश्रयतावच्छेदकत्वरूपकारणतावच्छेदकसम्बन्धेन अज्ञानम् इदंपदार्थे वर्तते , तत्र प्रतियोगितासम्बन्धेन तादात्म्यम् उत्पद्यते । ननु अस्य कार्यकारणभावस्य "इद रजतम्" इति ज्ञाने विषयीभूते रजते व्यतिरेकव्यभिचारः इति शङ्का , यतो हि अस्मिन् ज्ञाने विषयीभूते रजते स्वाश्रयतावच्छेदकतासम्बन्धेन अज्ञानरूपं कारणं नास्ति परन्तु प्रतियोगितासम्बन्धेन तादात्म्यं तत्र वर्तते । तत्रेदं समाधानम् ; कारणाभावे कार्यसत्वं स्यात् तर्हि व्यतिरेकव्यभिचारः आपादयितुं शक्यते परन्तु रजते प्रतियोगितासम्बन्धेन तादात्म्योत्पत्तिरेव नास्तीति न दोषः । रजतप्रतियोगिकत्वं तादात्म्ये यदि स्यात् तदानीं तादात्म्यं प्रतियोगितासम्बन्धेन रजते स्यात् परन्तु तस्मिन् तादात्म्ये रजतप्रतियोगिकत्वं नाङ्गीक्रियते । ननु तर्हि तादात्म्यस्य कथं ज्ञाने भानमिति चेत् रजतसंसर्गतया भानमङ्गीक्रियते । ननु रजते तादात्म्यप्रतियोगित्वं यदि नास्ति तर्हि रजतसंसर्गतया तादात्म्यभानमपि न स्यात् । रजतसंसर्गतया तादात्म्यं यदि भासते तर्हि विशिष्टबुद्धौ संसर्गप्रतियोगित्वानुयोगित्वयोः विषयतया रजते तादात्म्यप्रतियोगित्वम् अवश्यं भासते इति अङ्गीकर्तव्यम् ।तथा च रजते तादात्म्यप्रतियोगित्वमपि वर्तते इति व्यतिरेकव्यभिचार तदवस्थ एव इति चेन्न विशिष्टबुद्धौ विशेषणनिष्ठं संसर्गीयप्रतियोगित्वं विशेष्यनिष्ठम् संसर्गीयानुयोगित्वञ्च न भाति ।तस्मात् विशेषणविशेष्ययोः संसर्गीयप्रतियोगित्वानुयिगित्वे न सिद्धयतः , अनुभवानुसारेण हि तयोः सिद्धिः वक्तव्या ।तस्मात् रजते प्रतियोगितासम्बन्धेन तादात्म्यानुत्पत्त्या न व्यतिरेकव्यभिचारः । नन्वेवम् "रजतम् इदम्" इत्याकारकज्ञाने अपि इदमि तादात्म्यप्रतियोगित्वाभानात् पूर्वोक्तकार्यकारणभावः नावश्यकः इति चेत् इष्टापत्तिः । वस्तुतस्तु भासमानवैशिष्ट्यीयभासमानप्रतियोगित्वं विशेषणत्वम् भासमानवैशिष्ट्यीयभासमानानुयोगित्वं विशेष्यत्वम् इति पक्षस्य सिद्धान्ते अङ्गीक्रियमाणत्वात् विशिष्टबुद्धौ संसर्गप्रतियोगित्वानुयोगित्वयोरपि भासमानत्वात् पूर्वोक्तकार्यकारणभावाङ्गीकारे व्यतिरेकव्यभिचारः तदवस्थ एव इति पृथक् कार्यकारणभावद्वयं कल्प्यते ; वस्तुतस्तु दोषादिघटिता सामग्येव रजतादिप्रातीतिकप्रतियोगिकतादात्म्ये नियामिका, व्यावहारिकप्रतियोगिके प्रातीतिके तादात्म्ये च अज्ञानाश्रयतावच्छेदकत्वं नियामकम् ।इति "इदं रजतम्" इत्यत्र यत् तादात्म्यम् विषयः तस्य रजतप्रतियोगिकत्वसिद्धये प्रथमः कार्यकारणभावः "दोषादिघटिता सामग्येव रजतादिप्रातीतिकप्रतियोगिकतादात्म्ये नियामिका" इत्यनेन प्रदर्शितः । कार्यम् – तादात्म्यम् कार्यतावच्छेदकसम्बन्धः – प्रातीतिकनिष्ठप्रतियोगितासम्बन्धः कारणम् – दोषः कारणतावच्छेदकसम्बन्धः – स्वजन्यप्रकारनिष्ठविषयतासम्बन्धः "इदं रजतम्" इत्याकारकज्ञाने रजतं प्रकारः , तच्च रजतं दोषजन्यम् इति स्वजन्यप्रकारनिष्ठविषयतासम्बन्धेन दोषः रजते वर्तते ।रजतस्य प्रातीतिकत्वात् रजते प्रातीतिकनिष्ठप्रतियोगितासम्बन्धेन तादात्म्यमुत्पद्यते ।अत्र कार्यतावच्छेदके प्रातीतिकनिष्ठत्वानिवेशे व्यावहारिके इदमि व्यतिरेकव्यभिचारः स्यात् , अतस्तन्निवेशः । "रजतम् इदम्" इति ज्ञाने विषयीभूतस्य तादात्म्यस्य इदंप्रतियोगिकत्वसिद्धये द्वितीयः कार्यकारणभावः प्रदर्शितः ; "व्यावहारिकप्रतियोगिके प्रतीतिके तादात्म्ये च अज्ञानाश्रयतावच्छेदकत्वं नियामकम् " इत्यनेन । कार्यम् – तादात्म्यम् कार्यतावच्छेदकसम्बन्धः – व्यावहारिकनिष्ठप्रतियोगितासम्बन्धः कारणम् – अज्ञानम् कारणतावच्छेदकसम्बन्धः – स्वाश्रयतावच्छेदकतासम्बन्धः इदंपदार्थस्य अज्ञानाश्रयचैतन्यावच्छेदकत्वात् कारणतावच्छेदकसम्बन्धेन कारणवत्वमस्ति । तस्य इदंपदार्थस्य व्यावहारिकत्वात् व्यावहारिकनिष्ठप्रतियिगितासम्बन्धेन तादात्म्यं तत्र उत्पद्यते ।

4 निगमनम्

तथा च रजतस्य यः तादात्म्येन विशेषणतया च आरोपः, रजते च इदमः तादाम्येन विशेषणतया च यः आरोपः वर्तते, तयोः अनुभवबलादेव यथा इदमि रजततादात्म्यं, रजते च इदंतादात्म्यं अस्तीति अङ्गीक्रियते तद्वत् सद्रूपब्रह्मणि घटादिदृश्यतादात्म्यम्, घटादिदृश्ये च सत्तादात्म्यम् अस्तीति अङ्गीकर्तव्यम् । तथा च सति पूर्वपक्षिणा आपादितः पक्षाप्रसिद्धिरूपः दोषः वारितः । तथा च बिर्दुष्टोऽयम् अनुमानप्रयोगः ।

ग्रन्थसूचिका

1. विद्वलेशीयव्याख्योपबृंहिता गौडब्रह्मानन्दीयव्याख्यासनाथीकृता अद्वैतसिद्धिः, परिमल पब्लिकेशन्स, दिल्ली, 2014.
2. Nyāyāmṛta and Advaitasiddhi with seven commentaries, Metropolitan printing and publishing house, Calcutta, 1934.
3. लघुचन्द्रिकाप्रकाशः, प्रथमभागः, शङ्कर अद्वैतशोधकेन्द्रम्, श्रीशारदापीठम्, शृङ्गेरी, २००१.
4. बालबोधिनीसहिता अद्वैतसिद्धिः, प्राच्यभारती ग्रन्थमाला-१३, तारा पब्लिकेशन्स, वाराणसी, १९७१.